## मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः । (१४३/१५२३)

प्रकृतिमात्राद् वा मयट् प्रत्ययो भवति भक्ष्याच्छादनवर्जितयोः विकारावयवयोरर्थयोर्भाषायां विषये [1]यथायथं प्रत्ययेषु प्राप्तेषु । अश्ममयम्, [2]आश्मनम् । [3]मूर्वामयम्, मौर्वम् । भाषायाम् इति किम् ? [4]बैल्वः खादिरो वा यूपः स्यात् । अभक्ष्याच्छादनयोः इति किम् ? मौद्गः सूपः । कार्पासमाच्छादनम् । एतयोः [5]इत्यनेन किं [6]यावता विकारावयवौ प्रकृतावेव ? [7]ये विशेषप्रत्ययाः 'प्राणिरजतादिभ्योऽञ्' (४.३.१५४/१५३२) इत्येवमादयस्तद्विषयेऽपि यथा स्यात्, कपोतमयम्, कापोतम्, लोहमयम्, लौहम् इति ॥

## नित्यं वृद्धशरादिभ्यः । (१४४/१५२४)

भाषायामभक्ष्याच्छादनयोः इत्येव[8] । वृद्धेभ्यः प्रातिपदिकेभ्यः शरादिभ्यश्च [9]अभक्ष्याच्छादनयोः विकारावयवयोः[10] भाषायां विषये नित्यं मयट् प्रत्ययो भवति । वृद्धेभ्यस्तावत् – आम्रमयम् । [11]शालमयम् । [12]शाकमयम् । शरादिभ्यः – शरमयम् । दर्भमयम् । [13]मृन्मयम् । नित्यग्रहणं किं [14]यावता आरम्भसामर्थ्यादेव[15] नित्यं भविष्यति ? [16]एकाचो नित्यं मयटमिच्छन्ति, तदनेन क्रियते, त्वङ्मयम्, स्रङ्मयम्[17], वाङ्मयम् इति ।

शर । दर्भ । मृत् । कुटी । तृण । सोम । [18]बल्वज । शरादिः ॥

## गोश्च पुरीषे । (१४५/१५२५)

गोशब्दात् पुरीषेऽभिधेये मयट् प्रत्ययो भवति । गोमयम् । पुरीषे इति किम् ? गव्यं पयः । पुरीषं न विकारो न चावयवः, [19]तस्येदंविषये विधानम् । विकारावयवयोस्तु गोपयसोर्यत् (४.३.१६०/१५३८) वक्ष्यति ॥

## पिष्टाच्च । (१४६/१५२६)

[20]पिष्टशब्दान् नित्यं मयट् प्रत्ययो भवति तस्य विकारः इत्येतस्मिन् [21]विषये । अणोऽपवादः । पिष्टमयं [22]भस्म ॥

## सञ्ज्ञायां कन् । (१४७/१५२७)

पिष्टशब्दात् कन् प्रत्ययो भवति विकारे सञ्ज्ञायां विषये । मयटोऽपवादः । [23]पिष्टकः ॥

## व्रीहेः पुरोडाशे । (१४८/१५२८)

व्रीहिशब्दान् मयट् प्रत्ययो भवति पुरोडाशे विकारे । बिल्वाद्यणोऽपवादः । [24]व्रीहिमयः पुरोडाशः । व्रैहम् अन्यत् ॥

---

1. यथायोगं ब. क. 2. आश्मम् ड. ह. 3. दूर्वामयं दौर्वम् ड. 4. वैल्वः ब, खैल्वः ह. 5. अनेन नास्ति ड. फ. 6. वाक्यमिदं नास्ति क. 7. ये नास्ति फ. 8. वर्तते इत्यधिकम् ह. 9. भक्ष्याच्छादनवर्जितयोः फ. 10. अर्थयोः इत्यधिकम् फ. 11. सालमयम् ह. 12. नास्ति ब. क. ड. 13. नास्ति फ. 14. यावता नास्ति फ. 15. मयट् प्रत्ययो इत्यधिकम् फ. 16. केचित् इत्यधिकम् फ. ह. 17. इति इत्यधिकम् फ, स्रङ्मयम् नास्ति ह, वाङ्मयम् नास्ति फ. 18. बिल्वज फ. 19. तेन इत्यधिकम् ह. 20. पिष्टाच्च ब. 21. अर्थे ह. 22. हविः फ, अपूपम् ह. 23. पिष्टकाः ब. ड. इ. ह. 24. व्रीहिमयाः पुरोडाशाः फ.